**अनुरूपतः, -पेण, -पशः** *adv.* Conformably or agreeably to.

**अनुलग्न** *a.* Attached to, intent on, seeking or pursuing after; येन आर्यायाः सुस्निग्धा दृष्टिरनुलग्ना Mk. 4 intently fixed.

**अनुलापः** Repetition, tautology.

**अनुलालित** *a.* Entertained कुशिकसुतवचोनुलालिताभ्यां सुखमिव सा विबाभौ विभावरी Rām. 1. 23. 24.

**अनुलासः, -स्यः** [ लस्-नर्तने-घञ् ] A peacock; hence metaphorically 'a corner' as in वास्तुच्छिद्रानुलासः Kau. A. 2. 4.

**अनुलिप्** 6 P. To anoint, besmear (with perfumes &c. after bathing); smear, daub, cover over; वपुरन्वलिप्त न वधूः Śi. 9. 51, 9. 15; प्रभानुलिप्तश्रीवत्सम् R. 10. 10 covered with; तच्छायानुलिप्तभूतलाम् K. 131; हरिभिरचिरभासा तेजसा चानुलिप्तैः Ś. 7. 7; so स्नातानुलिप्तः; तिमिरानुलिप्त enveloped in darkness; स्नापितोऽनुलेपितश्च Dk. 71 besmeared with perfumes &c.

**अनुलेपः, -लेपनम्** 1 Unction, anointing, smearing. -2 Ointment, unguent such as sandal juice, oil &c.; any emollient or oily application; °आर्द्रमृदङ्गध्वनि K. 28 rubbed with paste; सुरभिकुसुमधूपानुलेपनानि K. 324.

**अनुलेपक, -लेपिन्** *a.* One who anoints (the body) with unguents &c.

**अनुलीन** *a.* Hidden, clinging to, attached; स्कन्धं सुगन्धिमनुलीनवता नगस्य Śi. 5. 46; जनादनुलीनः Dk. 104 concealed from the people.

**अनुलोम** *a.* [ अनुगतः लोम P. V. 4. 75. ] 1 'With the hair', regular, in natural order, successive (opp. प्रतिलोम); hence favourable, agreeable; °सुखो वायुरनुसारयतीव माम् Rām.; त्रिरेनामनुलोमामनुमार्ष्टि Śat. Br.; °कृष्टं क्षेत्रं प्रतिलोमं कर्षति Sk. ploughed in the regular direction. -2 Mixed as a tribe. **-मा** A woman of the lower caste than that of the man's whom she marries; सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः Y. 2. 288. **-मम्** *adv.* In regular or natural order; प्रतिलोममालिम्पेन्नानुलोमम् Suśr. **-माः** (pl.) Mixed castes. **-Comp. -अय** *a.* having fortune favourable. **-अर्थ** *a.* speaking in favour of; जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः Śi. 2. 25. **-कल्पः** the thirty-fourth of the Atharvaveda Pariśiṣṭas. **-ग** *a.* straight going; प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः Mb. 3. 190. 92. **-ज, -जन्मन्** *a.* born in due gradation, offspring of a mother inferior in caste to the father; said of the mixed tribes; संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः Ms. 10. 25; Y. 1. 95. **-परिणीत** *a.* married in regular gradation.

**अनुलोमनम्** 1 Regular gradation, sending or putting in the right direction. -2 (In medicine) Carrying off by the regular channels, such as purging; alleviation.

**अनुलोमयति** Den. P. 1 To stroke or rub with the hair or with the grain, go with the grain; तत्रं प्रतिलोमं मनुलोमयेत् Suśr. -2 To evacuate, purge, carry off by the regular channels.

**अनुल्वण** *a.* 1 Not excessive, neither more nor less (अनतिरिक्त, अन्यूनाधिक); smoothed, free from disturbing circumstances (?). -2 Not clear or manifest.

**अनुवंशः** [ वंशमनुगतो वृत्तान्तः ] 1 A genealogical table; तत्रानुवंशो रुद्रस्य तं निबोध युधिष्ठिर Mb. 3. 114. 10. यत्रानुवंशं भगवान् जामदग्न्यस्तथा जगौ Mb. -2 Modern race or species; new family. **-शम्** *ind.* अत्रानुवंशं पठतः शृणु मे कुरुनन्दन Mb. 3. 129. 8.

**अनुवंश्य** *a.* [ अनुवंशे भवः यत् ] Relating to a genealogical table.

**अनुवक्र** *a.* [ अनुक्रमेण वक्रः ] Very crooked; somewhat crooked or oblique; °ग moving somewhat obliquely or retrogressively (said of planets).

**अनुवच्** 2 P. 1 To say or speak after or for one; येषां द्विजानां सावित्री नानूच्येत यथाविधि Ms. 11. 191. -2 To repeat, recite, reiterate; शतमनूच्यमायुष्कामस्य Ait. Br.; learn, study; परोवरं यज्ञोऽनूच्यते Śat. Br.; वेदमनूच्याचार्योन्तेवासिनमनुशास्ति Tait. Up. 1. 10. अरण्येऽनूच्यमानत्वादारण्यकम् Sāy., see अनूचान below. -3 To concede the point, assent to, yield. -4 To name, call. *-Caus.* To cause to recite; to read to oneself (before reading aloud); oft. used in dramas; उभे नाम मुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः Ś. 1; अनुवाचय तावत् यद्विरुद्धं श्रोष्यामि V. 2; Mu. 1; अनुवाचितलेखममात्यमवलोक्य M. 1.

**अनुवक्तृ** *m.* Repeating, reciting (गुरुमुखोच्चारितानुरूपपाठक); replying &c.

**अनुवचनम्** 1 Repetition, recitation; teaching, instruction, lecture, वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥ Y. 3. 190. तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति Bri. Up. 4. 4. 22. -2 A chapter, section, lesson, division. -3 Repetition of Mantras or texts in conformity with प्रैष or injunction said by other priests.

**अनुवाकः** [ अनूच्यते इति, वच् घञ् कुत्वम् P. II. 4. 29 Vārt. ] 1 Repeating, reciting reading. अनुवाकहताबुद्धिः Mb. 5. 132. 6. -2 A subdivision of the Vedas, section, chapter; जेतुं जैत्रानथ खलु जपन्सूक्तसामानुवाकान् Mv. 3. 23. -3 Chapter or section referring to a compilation from the Ṛigveda or Yajurveda (ऋग्यजुःसमूह). -4 A statement in the ब्राह्मणs illustrating the mantrās; यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च Mb. 12. 47. 26. **-Comp. -अनुक्रमणी** N. of a table of contents, referring to the Ṛigveda, attributed to Śaunaka. **-सङ्ख्या** the fourth of the eighteen Pariśiṣṭas of the Yajurveda.

**अनुवाक्या** [ वच्-ण्यत्-कुत्वम् ] A verse recited by the Hotṛi priest, in which the god is invoked to accept the offering prepared for him, or a sort of priest;